# साधु: गोपालकृष्ण:

## (अव्ययप्रयोग: युष्मद् शब्दस्य च प्रयोग:)



स्वाधीनताया: पूर्वघटना । एकस्मिन् विद्यालये बहव: छात्रा: पठन्ति स्म । एकदा शिक्षक: छात्राणां परीक्षां कर्तुं चिन्तितवान् । स: छात्रान् पृष्टवान् - 'प्रियशिष्या: ! **यूयं** परीक्षार्थं प्रस्तुता: ?' छात्रा: प्रस्तुता: इति कथितवन्त: । शिक्षक: सूचितवान् - ''**यूयं** सर्वे परीक्षाखातिकां लेखनीं च उन्मोचयत'' ।

छात्रा: खातिकां लेखनीं च उद्घाटितवन्त: । शिक्षक: कृष्णफलके प्रश्नान् लिखितवान् । छात्रा: उत्तराणि लिखित्वा दर्शितवन्त: । तेषु गोपालकृष्ण गोखले अपि आसीत् । शिक्षक: उत्तराणां मूल्याङ्कनं **कृत्वा** गोपालकृष्णम् आहूतवान् - ''अरे गोपाल ! **त्वम् अत्र** आगच्छ ।'' गोपाल: शिक्षकस्य समीपं गतवान् । शिक्षक: कथितवान्- ''अरे ! **त्वया** तु **सम्यक्** लिखितम् । **त्वत्** अधिकम् कोऽपि न लिखितवान् । अत: **तुभ्यम्** एकं पुरस्कारं दातुम् इच्छामि । भो : छात्रा: ! **युष्मासु** एष: गोपाल: श्रेष्ठ: । एष: परीक्षायां सम्यक् लिखितवान् ।''

किन्तु शिक्षकस्य वचनं श्रुत्वा गोपालस्य मुखं म्लानम् अभवत् । तत् दृष्ट्वा शिक्षक: पृष्टवान् - 'अरे गोपाल ! **तव** मुखं किमर्थं म्लानं दृश्यते ?' गोपाल: कथितवान् - ''गुरुदेव ! **युष्माकं** पुरस्कारं **प्राप्तुम्** अहम् अयोग्य: । परीक्षायाम् अहं मित्रस्य साहाय्यं नीतवान् । अहं **युष्मान्** प्रतारितवान् । अहम् **अतीव** लज्जित: । अहं दण्डनीय: ।'' इति कथयन् स: **उच्चै:** क्रन्दितवान् । तस्य क्रन्दनं श्रुत्वा छात्रा: अपि क्रन्दितवन्त: ।

एतादृशेन सत्यवचनेन शिक्षक: सन्तुष्ट: । स: गोपालम् आलिङ्ग्य कथितवान् - 'साधु बालक! साधु। एष: पुरस्कार: **तव** एव । **तव** सत्यनिष्ठाया: कृते एष: दीयते । **त्वं** सत्यवादी । अत: अहं **त्वयि** अतीव स्निह्यामि । आगामिकाले त्वं भारतस्य महान् सेवक: भविष्यसि । सर्वे चिरकालं **त्वां** स्मरिष्यन्ति ।

| |
|---|
| **कर्तुम्, उन्मोचयत, कृष्णफलकम्, सम्यक्, म्लानम्, प्रतारितवान्, दृष्ट्वा, तव, त्वाम् ।** |

## टिप्पणी

**शब्दार्थ :**

चिन्तितवान् - चिन्तनं कृतवान् (ଭାବିଲା) ।

दर्शितवन्तः - प्रदर्शनं कृतवन्तः (ଦେଖାଇଲେ) ।

पृष्टवान् - प्रश्नं कृतवान् (ପଚାରିଲା) ।

मूल्याङ्कनम् - अङ्कप्रदानम् (ନମ୍ବର ଦେବା) ।

सूचितवान् - सूचनां दत्तवान् (ସୂଚନା ଦେଲେ) ।

सम्यक् - समीचीनम् (ଠିକ୍ ଭାବରେ) ।

उन्मोचयत - उद्घाटयत (ଖୋଲ) ।

प्रतारितवान् - प्रतारणां कृतवान् (ଠକେଇଛି) ।

कृष्णफलके - श्यामपटे (କଳାପଟାରେ) ।

आलिंग्य - आलिङ्गनं कृत्वा (କୁଣ୍ଢାଇ) ।

परीक्षाखातिकाम् - परीक्षाखातिका (ପରୀକ୍ଷା ଖାତା) ।

युष्माकम् - मान्यार्थे बहुवचनम् (ତୁମର/ଆପଣଙ୍କର)।

युष्मान् - मान्यार्थे बहुवचनम् (ତୁମ୍ଭଙ୍କୁ / ଆପଣଙ୍କୁ)।

## अभ्यास :

**उच्चैः पठत, लिखत -** **'युष्मद्' शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

१. **योग्यपदेन शून्यस्थानं पूरयत -**

(क) <u>त्वं</u> कुत्र गच्छसि ? (युष्मद्, १मा, एकवचनम्)

(ख) पिता ................ किं वदति ? (युष्मद्, २या, एकवचनम्)

(ग) .............. सर्वे भारतीयाः । (युष्मद्, १मा, बहुवचनम्)

(घ) ............... विद्यालयः गम्यते ? (युष्मद्, ३या, एकवचनम्)

(ङ) तत्र ................ किं क्रियते ? (युष्मद्, ३या, बहुवचनम्)

(च) गोपालः .............. जुगुप्सते । (युष्मद्, ५मी, एकवचनम्)

(छ) अहं .................. धनं दास्यामि । (युष्मद्, ४र्थी, एकवचनम्)

(ज) शिक्षकः ............. विद्यां ददाति । (युष्मद्, ४र्थी, बहुवचनम्)

(झ) ..................... नाम किम् ? (युष्मद्, ६ष्ठी, एकवचनम्)

(ञ) .................... मम विश्वासः नास्ति । (युष्मद्, ७मी, एकवचनम्)

२. **उचितपदेन शून्यस्थानं पूरयत -**

(क) अहं ................. एकं विषयं वदिष्यामि । (त्वम्, त्वाम्, यूयम्)

(ख) ............... सर्वे उत्तमाः बालकाः । (त्वम्, युवाम्, यूयम्)

(ग) अहं .............. एकां कथां कथयामि । (यूयम्, त्वया, युष्मान्)

(घ) शिक्षकः ............... पाठं ददाति । (तुभ्यम्, त्वत्, त्वम्,)

(ङ) ................ विद्यालयस्य नाम किम् ? (त्वयि, त्वाम्,, तव)

(च) शिक्षकः ................. विश्वासं करोति । (त्वयि, त्वाम्,, तव)

(छ) ..................... कः श्रेष्ठः ? (यूयम्, युष्माभिः, युष्मासु)

(ज) ................... तत्र गच्छतम् । (युवाम्, यूयम्, त्वम्)

(झ) ................. गृहं कुत्र ? (युष्माभिः, यूयम्, युष्माकम्)

(ञ) ................ किं बालेश्वरं गमिष्यथ ? (यूयम्, युष्मान्, युवाम्)

३. **एकपदेन उत्तरं कुरुत -**

(क) शिक्षकः किं कर्त्तुं चिन्तितवान् ?

(ख) छात्राः किं लिखित्वा दर्शितवन्तः ?

(ग) शिक्षकः कृष्णफलके कान् लिखितवान् ?

(घ) गोपालः कस्य समीपं गतवान् ?

(ङ) युष्मासु एषः कः श्रेष्ठः ?

(च) गोपालस्य मुखं किम् अभवत् ?

(छ) केन शिक्षकः सन्तुष्टः ?

४. **शून्यस्थानं पूरयत -**

(क) ................ परीक्षार्थं प्रस्तुताः ?

(ख) अरे गोपाल ! ............... अत्र आगच्छ ।

(ग) अरे .............. तु सम्यक् लिखितम् ।

(घ) ................. एकं पुरस्कारं दातुम् इच्छामि ।

(ङ) ............... एषः गोपालः श्रेष्ठः ।

(च) अरे गोपाल ! ................ मुखं किमर्थं म्लानं दृश्यते ?

(छ) गुरुदेव ! ..................... पुरस्कारं प्राप्तुम् अहम् अयोग्यः ।

(ज) अहं .................. प्रतारितवान् ।

(झ) एषः पुरस्कारः ................. एव ।

(ञ) अतः अहं ................ अतीव स्निह्यामि ।

(त्वम्, तुभ्यम्, तव, यूयम्, त्वया, युष्मासु, त्वयि, युष्माकम्, तव, युष्मान्)

५. **मातृभाषया अनुवादं कुरुत -**

(क) एकदा शिक्षकः छात्राणां परीक्षां कर्तुं चिन्तितवान् ।

(ख) प्रियशिष्याः ! यूयं परीक्षार्थं प्रस्तुताः ?

(ग) यूयं सर्वे परीक्षाखातिकां लेखनीं च उन्मोचयत ।

(घ) शिक्षकः कृष्णफलके प्रश्नान् लिखितवान् ।

(ङ) अरे गोपाल ! त्वम् अत्र आगच्छ ।

(च) तुभ्यम् एकं पुरस्कारं दातुम् इच्छामि ।

(छ) एषः परीक्षायां सम्यक् लिखितवान् ।

(ज) तव मुखं किमर्थं म्लानं दृश्यते ।

(झ) गुरुदेव ! युष्माकं पुरस्कारं प्राप्तुम् अहम् अयोग्यः ।

(ञ) अहं युष्मान् प्रतारितवान् ।

(ट) तस्य क्रन्दनं श्रुत्वा छात्राः अपि क्रन्दितवन्तः ।

(ठ) साधु बालक ! साधु, एषः पुरस्कारः तव एव ।

(ड) अतः अहं त्वयि अतीव स्निह्यामि ।

(ढ) आगामिकाले त्वं भारतस्य महान् सेवकः भविष्यसि ।

(ण) सर्वे चिरकालं त्वां स्मरिष्यन्ति ।

६. **विक्षिप्तवर्णैः शब्दं रचयत -**

उदाहरणम् - कः ल बा - बालकः

| | | | | | |
|---|---|---|---|---|---|
| (१) | ल वि ये द्या | ...................... | (२) | न् वा चि त न्ति | ...................... |
| (३) | थि क व त न्तः | ...................... | (४) | द्घा उ य ट त | ...................... |
| (५) | णि उ त्त रा | ...................... | (६) | कृ गो ल ष्णः पा | ...................... |
| (७) | र स्का पु र म् | ...................... | (८) | नी द ण्ड यः | ...................... |
| (९) | न्दि त क्र न् वा | ...................... | (१०) | का आ मि ले गा | ...................... |

७. **विषयानुसारं स्तम्भमेलनं कुरुत -**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| बहवः | प्रस्तुताः |
| छात्राः | छात्राः |
| गोपालस्य | दातुम् इच्छामि |
| त्वयि | मुखम् |
| तुभ्यम् | स्निह्यामि |

८. **मूलशब्दं लिखत -**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| उदा- (क) | छात्राणाम् | = | छात्र | (ख) | यूयम् | = | ..................... |
| (ग) | प्रश्नान् | = | ..................... | (घ) | आगामिकाले | = | ..................... |
| (ङ) | लेखनीम् | = | ..................... | (च) | उत्तराणाम् | = | ..................... |
| (छ) | तुभ्यम् | = | ..................... | (ज) | मित्रस्य | = | ..................... |
| (झ) | सत्यवचनेन | = | ..................... | (ञ) | त्वयि | = | ..................... |

●